# .. Morning salutations to shiva ..

## ॥ श्रीविश्वनाथ सुप्रभातं ॥

### Document Information

Text title : Morning salutations to shiva
File name : vishwa-suprabhaatam.itx
Category : suprabhAta
Location : doc_shiva
Author : Traditional
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Subramanian Ganesh sgesh at hotmail.com
Proofread by : Subramanian Ganesh sgesh at hotmail.com
Latest update : November 29, 2000
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 3, 2016

*sanskritdocuments.org*

# ॥ श्रीविश्वनाथ सुप्रभातं ॥

उत्तिष्ठ भैरवस्वामिन् काशिकापुरपालक ।
श्रीविश्वनाथभक्तानां सम्पूरय मनोरथम् ॥ १॥

स्नानाय गाङ्गसलिलेऽथ समर्चनाय विश्वेश्वरस्य बहुभक्तजना उपेताः ।
श्रीकालभैरव लसन्ति भवन्निदेशं उत्तिष्ठ दर्शय दशां तव सुप्रभातम् ॥ २॥

यागव्रतादिबहुपुण्यवशं यथा त्वं पापात्मनामपि तथा सुगतिप्रदाऽसि ।
कारुण्यपूरमयि शैलसुतासपत्नि मातर्भगीरथसुते तव सुप्रभातम् ॥ ३॥

दुग्धप्रवाहकमनीयतरङ्गभङ्गे पुण्यप्रवाहपरिपाथितभक्तसङ्गे ।
नित्यं तपस्विजनसेवितपादपद्मे गङ्गे शरण्यशिवदे तव सुप्रभातम् ॥ ४॥

वाराणसीस्थितगजानन दुण्ठिराज सम्प्रार्थितेऽष्टफलदानसमर्थमूर्ते ।
उत्तिष्ठ विघ्नविरहाय भजामहे त्वां श्रीपार्वतीतनय भोस्तव सुप्रभातम् ॥ ५॥

पूजास्पद प्रथममेव सुरेशु मध्ये सम्पूरणे कुशल भक्तमनोरथानाम् ।
गीर्वाणबृन्दपरिपूजितपादपद्म संजायतां गणपते तव सुप्रभातम् ॥ ६॥

कात्यायनी प्रमथनाथशरीरभागे भक्तालिगीतमुखरीकृतपादपद्मे ।
ब्रह्मादिदेवगणवन्दितदिव्यशौर्ये श्रीविश्वनाथदयिते तव सुप्रभातम् ॥ ७॥

प्रातः प्रसीद विमले कमलायताक्षि कारुण्यपूर्णहृदये नमतां शरण्ये ।
निर्धूतपापनिचये सुरपूजितांघ्रे श्रीविश्वनाथदयिते तव सुप्रभातम् ॥ ८॥

सस्यानुकूलजलवर्षणकार्यहेतोः शाकम्भरीति तव नाम भुवि प्रसिद्दम् ।
सस्यातिजातमिह शुष्यति चान्नपूर्णे उत्तिष्ठ सर्वफलदे तव सुप्रभातम् ॥ ९॥

सर्वोत्तमं मानवजन्म लब्ध्वा हिनस्ति जीवान् भुवि मर्त्यवर्गः ।
तद्वारणायाशु जहीहि निद्रां देव्यन्नपूर्णे तव सुप्रभातम् ॥ १०॥

श्रीकण्ठ कण्ठधृतपन्नग नीलकण्ठ सोत्कण्ठभक्तनिवहोपहितोपकण्ठ ।
उत्तिष्ठ सर्वजनमङ्गलसाधनाय विश्वप्रजाप्रथितभद्र जहीहि निद्राम् ॥ ११॥

गङ्गाधराद्रितनयाप्रिय शान्तमूर्ते वेदान्तवेद्य सकलेश्वर विश्वमूर्ते ।
कूटस्थनित्य निखिलागमगीतकीर्ते देवासुरार्चित विभो तव सुप्रभातम् ॥ १२॥

श्रीविश्वनाथकरुणामृतपूर्णसिन्धो शीतांशुखण्डसमलंकृतभव्यचूड ।
भस्माङ्गरागपरिशोभितसर्वदेह वाराणसीपुरपते तव सुप्रभातम् ॥ १३॥

देवादिदेव त्रिपुरान्तक दिव्यभाव गङ्गाधर प्रमथवन्दित सुन्दराङ्ग ।
नागेन्द्रहार नतभक्तभयापहार वाराणसीपुरपते तव सुप्रभातम् ॥ १४॥

वेदान्तशास्त्रविशदीकृतदिव्यमूर्ते प्रत्यूषकालमुनिपुङ्गवगीतकीर्ते ।
त्वय्यर्पितार्जितसमस्तसुरक्षणस्य वाराणसीपुरपते तव सुप्रभातम् ॥ १५॥

कैलासवासमुनिसेवितपादपद्म गङ्गाजलौघपरिषिक्तजटाकलाप ।
वाचामगोचरविभो जटिलत्रिनेत्र वाराणसीपुरपते तव सुप्रभातम् ॥ १६॥

श्रीपार्वतीहृदयवल्लभ पञ्चवक्त्र श्रीनीलकण्ठ नृकपालकलापमाल ।
श्रीविश्वनाथमृदुपंकजमंजुपाद् श्रीकाशिकापुरपते तव सुप्रभातम् ॥ १७॥

काशी त्रितापहरणी शिवसद्मभूता शर्मेश्वरी त्रिजगतां सुपुरीषु हृद्या ।
विद्याकलासु नवकौशलदानशीला श्रीकाशिकापुरपते तव सुप्रभातम् ॥ १८॥

श्रीविश्वनाथ तव पादयुगं स्मरामि गङ्गामघापहरणीं शिरशा नमामि ।
वाचं तवैव यशसाऽनघ भूषयामि  वाराणसीपुरपते तव सुप्रभातम् ॥ १९॥

नारीनतेश्वरयुतं निजचारुरूपं स्त्रीगौरवं जगति वर्धयितुं तनोषि ।
गङ्गां हि धारयसि मूर्ध्नि तथैव देव वाराणसीपुरपते तव सुप्रभातम् ॥ २०॥

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ॥

ॐ मङ्गलं भगवान् शम्भो मङ्गलम् वृषभध्वज ।
मङ्गलं पार्वतीनाथ मङ्गलं भक्तवत्सल ॥

। एतत् श्लोकद्वयं प्राचीनकविकृतम् ।

Encoded by Subramanian Ganesh sgesh@hotmail.com

.. Morning salutations to shiva ..
was typeset on August 3, 2016

Please send corrections to *sanskrit@cheerful.com*